# 6. कारकोपपदविभक्तिः

## अभ्यासः

### प्रश्न 1. उचितपदानि चित्वा रिक्तस्थानानि पूरयत –

1. ……….. पठन्ति। (छात्रौ, छात्राः)
2. ……….. पाठयति। (अध्यापकाः, अध्यापकः)
3. ………… पृच्छन्ति। (शिष्याः, शिष्यौः)
4. …………… वदतः। (बालौ, बालः)
5. ………………… विकसन्ति। (पुष्पे, पुष्पाणि)
6. …………….. पतति। (फलम्, फले)

**उत्तर:**

1. छात्राः,
2. अध्यापकः
3. शिष्याः
4. बालौ
5. पुष्पाणि
6. फलम्

### प्रश्न 2. अधोलिखितम् अनुच्छेद पठित्वा कर्तृपवानि चित्वा लिखत –

वृक्षे अनेके खगाः वसन्ति। ते परस्परं प्रेम्णा व्यवहरन्ति। एकदा एकः वानरः तत्र आगच्छत्। सः शाखासु कूर्दति। खगाः दुःखिताः भवन्ति। ते न जानन्ति कथं अस्य प्रतिकारः कर्तव्यः। पुनः ते अचिन्तयन्-वयं मिलित्वा अस्य उपरि प्रहार कुर्मः।तदा वानरः आगच्छत्। ते तस्य उपरि प्रहारम् अकुर्वन्। वानरः आहतः अभवत्। ततः परं सः कदापि तत्र न आगच्छत्।

**उत्तर:**

| | | |
|---|---|---|
| खगाः | ते | वानरः |
| सः | खगाः | ते |
| ते | वयम् | वानरः |
| ते | वानरः | सः |


**प्रश्न 3. उदाहरणानुसारं सार्थक पदं लिखत –**

| | | | | | |
|---|---|---|---|---|---|
| i. | क: | शि | क्ष | | शिक्षक: |
| ii. | नि | ला | फ | | .................................... |
| iii. | वा | र: | न | | .................................... |
| iv. | सु | शा | खा | | .................................... |
| v. | क | चि | दा | त् | .................................... |

**उत्तर:**

| | | | | | |
|---|---|---|---|---|---|
| (*i*) | क: | शि | क्ष | | **शिक्षक:** |
| (*ii*) | नि | ला | फ | | **फलानि** |
| (*iii*) | वा | र: | न | | **वानर:** |
| (*iv*) | सु | शा | खा | | **शाखासु** |
| (*v*) | क | चि | दा | त् | **कदाचित्** |

**प्रश्न 4. उदाहरणानुसारं शब्दरचनां कुरुत –**




यथा-वानराः

**उत्तर:**




(i) धीवराः
(ii) शिल्पकाराः
(iii) गीतकाराः
(iv) द्यूतकाराः
(v) चर्मकाराः
(vi) कर्मकारा:

## कर्मकारकम्

### अभ्यासः

**प्रश्न 1. मञ्जूषायाः उचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

(पुत्रः आगच्छति।)
अमितः – मातः! अतीव बुभुक्षा बाधते माम्। किं भोजन सज्जम्?
अम्बा – आम् पुत्र! भोजनम् कुरु।
अमितः – किं पक्वम्? अम्बा – तोरिका।
अमितः अहो बहिर्गन्तव्यम्।
विलम्बः भवति। बुभुक्षा नास्ति।
अम्बा – (हसन्ती) 'तोरिका' इति कथने बुभुक्षा समाप्ता किम्?
अमितः – (हसन्) एवं नास्ति मातः!
अम्बा – तर्हि रोटिका कुत्र खादिष्यसि?
अमितः – न जानामि।
अम्बा – तर्हि आगच्छा। उष्णं शाकं रोटिकां च खाद।
अमितः – अस्तु, शीघ्रं खादित्वा। गच्छामि।

**मञ्जूषा**

*रोटिका, शाकं रोटिकां च, बुभुक्षा, पक्वम्, भोजनम्*

**प्रश्न 2. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

अङ्कुर – अमित! मम गृहम् परितः हरिताः वृक्षाः सन्ति। (गृह)
अमितः – अतिशोभनम्। मम गृहम् उभयतः अवकरगृहम् अस्ति। (गृह)
अङ्कुरः – एतत् तु स्वास्थाय न उचितम्।
अमितः – जानीमः वयम्।
अङ्कुरः – स्वास्थ्यम् विना तु जीवनं नरकायते। (स्वास्थ्य)
अमितः – धिक् एतादृशाः जनान् ये इतस्ततः अवकर क्षिपन्ति। (जन)

**प्रश्न 3. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

1. महिला: ..................... गच्छन्ति। (उद्यान)
2. तत्र ताः ................ कुर्वन्ति। (व्यायाम)
3. परस्परं .......... च कुर्वन्ति। (वार्तालाप)
4. ........................ च पश्यन्ति। (वृक्ष, पुष्प, बहुव.)
5. ताः पुष्पाणां ............... दृष्ट्वा प्रसीदन्ति (शोभा)

**उत्तर:**

1. उद्यानं
2. व्यायामम्
3. वार्तालाप
4. वृक्षान् पुष्पाणि च
5. शोभा

**प्रश्न 4. उदाहरणानुसारं लिखित –**

| यथा-शब्द: | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| जन | द्वितीया | जनम् | जनौ | जनान् |
| मनुष्य | द्वितीया | मनुष्यम् | मनुष्यौ | मनुष्यान् |
| पुरुष | द्वितीया | पुरुषम् | पुरुषौ | पुरुषान् |
| शाखा | द्वितीया | शाखाम् | शाखे | शाखाः |
| लता | द्वितीया | लताम् | लते | लताः |
| जिह्वा | द्वितीया | जिह्वा | जिह्वे | जिह्वाः |
| पत्र | द्वितीया | पत्रम् | पत्रे | पत्राणि |
| फल | द्वितीया | फलम् | फले | फलानि |
| पुष्प | द्वितीया | पुष्पम् | पुष्पे | पुण्पाणि |

**प्रश्न 5. कर्मकारक द्वितीयाविभक्तिं च प्रयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणाम् –**
1. कौमुदी संस्कृतं पठति।
2. वत्सला आम्रं खादति।

**उत्तर:**
1. देवदत्तः संस्कृतं पठति।
2. श्यामा वस्त्राणि क्षालयति।
3. शिक्षक : छात्रान् पाठयति।
4. फलानि वृक्षात् पतन्ति।
5. ब्राह्मणाः यज्ञं कुर्वन्ति

**करणकारकम् (तृतीया-विभक्तिः )**

**अभ्यासः**

**प्रश्न 1. उचितपदेन रिक्तस्थानानि पूरयत –**

1. गृहे आनन्दमयं वातावरण ............. भवति। (बालैः, बालान्)

2. विद्यालस्य विद्यालयत्वं ............ भवति। (छात्रान्, छात्रैः)
3. रङ्गशालायः शोभा ........... भवति। (उत्सवान्, उत्सवैः)
4. सभागारे जनाः ............ सह चर्चा कुर्वन्ति। (विद्वषां, विद्वद्भिः)

**उत्तर:**

1. बालैः
2. छात्रैः
3. उत्सवैः
4. विद्वद्भिः

**प्रश्न 2. अधोलिखितश्लोकेभ्यः तृतीयाविभक्तियुक्तपदानि चित्वा लिखत –**

यथा- सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठतम्।।

| | | |
|---|---|---|
| सत्येन | सत्येन | सत्येन |

**उत्तर:**

मनसा चिन्तितं कार्य वाचा नैव प्रकाशयेत्।
मन्त्रेण रक्षयेद् गूढ कार्ये चाऽपि नियोजयेत्।।

| | | |
|---|---|---|
| मनसा | वाचा | मन्त्रेण |

पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः।
नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः।

| | | |
|---|---|---|
| विविधैः | शीलैः | बुधैः |

दरिद्रता धौरतया विराजते,
कुवस्त्रता शुभ्रतया विराजते।

कदन्नता चोष्णतया विराजते,
कुरूपता शीलतया विराजते।

| | | | |
|---|---|---|---|
| धीरतीया | शुभ्रतया | उष्णतया | शीलतया |

उदाहरणानुसारं लिखत –

**उत्तरः**

| **शब्दः** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| निर्धन | तृतीया | निर्धनेन | निर्धनाभ्याम् | निर्धनै |
| जन | **तृतीया** | **जनेन** | **जनाभ्याम्** | **जनैः** |
| धनिक | **तृतीया** | **धनिकेन** | **धनिकाभ्याम्** | **धनिकैः** |
| शाखा | तृतीया | शाखया | शाखाभ्याम् | शाखाभिः |
| लता | **तृतीया** | **लतया** | **लताभ्याम्** | **लताभिः** |
| रमा | **तृतीया** | **रमया** | **रमाभ्याम्** | **रमाभिः** |


**प्रश्न 3. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

1. पुत्रः ........... सह गच्छति। (जनकस्य, जनकेन)
2. सः जनः ............. अन्धः तथापि पराश्रितः न अस्ति। (नेत्रयोः, नेत्राभ्याम्)
3. ............ होनः पशुभिः समानः। (विद्यायाः, विद्यया)
4. ................ किं प्रयोजनम्। (धनेन, धनात्)
5. सः ............ बधिरः अस्ति (कर्णाभ्याम्, कर्णन)

**उत्तरः**

1. जनकेन
2. नेत्राभ्याम
3. विद्यया
4. धनेन
5. कर्णाभ्याम्

**प्रश्न 4. तृतीया-बहुवचनशब्दानां रचनां कुरुत –**




**उत्तरः**




जनैः
जलैः
जपैः
गुहाभिः
गुरुभिः
गुटिकाभिः
मातृभिः
पितृभिः
भ्रातृभिः

**प्रश्न 5. करणकारक तृतीयाविभक्तिं च प्रयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पज्य वाक्यानि लिखत।**

**उदाहरणम् –**
1. गौतमी <u>कलमेन</u> पठति।

2. काशिका यानेन गच्छति।

**उत्तरः**
1. जनाः <u>वायुयानेन</u> गच्छन्ति।
2. छात्रः <u>वाहनने</u> गच्छति।
3. कन्या <u>अन्नेन</u> भोजन पचति।
4. सः <u>हस्तने</u> याचति।
5. बालः <u>मुखेन</u> खादति।

**सम्प्रदानकारकम् (चतुर्थी-विभक्तिः)**

**अभ्यासः**


**प्रश्न 1. कोष्ठकप्रदत्तपदैः सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

1. अद्य अधिकांशजनाः शिनवासरे ............. बहिः गच्छन्ति। (मनोरंजन)
2. ते रात्रौ बहिः ............ गच्छन्ति। (भोजन)
3. ............... ते चिरकालात् पंक्तौ तिष्ठन्ति। (आहार)
4. ............ सर्व प्रशंसनीयाः। (सत्कार्य)
5. स्व ..........” किं किं कुरुते मानवः (प्रसन्नता)

**उत्तरः**

1. मनोरंजनाय
2. भोजनाय
3. आहाराय
4. सत्यकार्याय
5. प्रसन्नतायै

**प्रश्न 2. अधोलिखितशब्दान् उदाहरणानुसारं लिखत –**


श्रमिक:
श्रमिकाय
श्रमिकाभ्याम्
श्रमिकेभ्य:
जन:
……………
……………
……………
लता
लतायै
लताभ्याम्
लताभ्य:
शाखा
……………
……………
……………
पत्रम्
पत्राय
पत्राभ्याम्
पत्रेभ्य:
फलम्
……………
……………
……………
कृषक:
……………
……………
……………
रमा
……………
……………
……………
पुष्पम्
……………
……………
……………

**उत्तर:**

- श्रमिक
  - श्रमिकाय
  - श्रमिकाभ्याम्
  - श्रमिकेभ्य:

- जन:
  - **जनाय**
  - **जनाभ्याम्**
  - **जनेभ्य:**

- लता
  - लतायै
  - लताभ्याम्
  - लताभ्य:

- शाखा
  - **शाखायै**
  - **शाखाभ्याम्**
  - **शाखाभ्य:**

- पत्रम्
  - पत्राय
  - पत्राभ्याम्
  - पत्रै:

- फलम्
  - **फलाय**
  - **फलाभ्याम्**
  - **फलै:**

- कृषक:
  - **कृषकाय**
  - **कृषकाभ्याम्**
  - **कृषकेभ्य:**

- रमा
  - **रमायै**
  - **रमाभ्याम्**
  - **रमाभ्य:**

- पुष्पम्
  - **पुष्पाय**
  - **पुष्पाभ्याम्**
  - **पुष्पेभ्य:**

**प्रश्न 3. चतुर्थी-विभक्तियुक्तपदानि स्थूलरेखया चिह्नतानि कुरुत पृथक्तया लिखत च –**

**(i) विद्या <u>विवादाय</u> धनं <u>मदाय</u>**

**उत्तर:**
विवादाय, मदाय

**(ii) शक्तिः परेषां <u>परिपीडनाय</u>।**
**उत्तर:**
परिपीडनाय

**(iii) खलस्य साधोर्विपरीतमेतत्**

**उत्तर:**
कोऽपि न

**(iv) <u>ज्ञानाय</u> <u>दानाय</u> च <u>रक्षणाय</u>।**
**उत्तर:**
ज्ञानाय, दानाय, रक्षणाय


**प्रश्न 4. कोष्ठकात् उचितं पदं चित्वा लिखत –**

1. बालाः ……….. क्रीडाक्षेत्रं गच्छन्ति। (खेलनाय, खेलनस्य)
2. सूदः ………….. पाकाशाला गच्छित। (भोजनापाचनायः भोजनापाचने)
3. जनाः ………….. किं किं न कुर्वन्ति। (उदरपूरणाय, उदरपूरणे)
4. कृषक : ……………….. सर्वत्र प्रसिद्धः अस्ति। (परिश्रमे, परिश्रमाय)
5. कुक्कुरः ……….. इतस्ततः भ्रमति। (भोजनं, भोजनाय)

**उत्तर:**

1. खेलनाय
2. भोजनपाचनाय
3. उदरपूरणाय
4. परिश्रमाय
5. भोजनाय

**प्रश्न 5. घटात् चतुर्थी-विभक्तियुक्तपदानि चित्वा उचितकोष्ठके लिखत –**




**उत्तरः**

| एकवचन | द्विवचनम् | बहुवचनम् |
|---|---|---|
| रवये, भानवे<br>मतये, सूर्याय<br>साधवे, मुनये | मुनिभ्याम्, नदीभ्याम्<br>बालिकाभ्याम्<br>महिलाभ्याम्<br>नदीभ्याम् | किरणेभ्यः, शिष्येभ्यः<br>छात्रेभ्यः, बालकेभ्यः<br>मतिभ्यः |

**अपादानकारकम् (पंचमी-विभक्तिः )**

**अभ्यासः**

**प्रश्न 1. कोष्ठके प्रदत्तशब्दैः सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।**

1. ……….. अङ्कुरः प्रभवति। (बीज)
2. ……………………. विद्युत् उद्भवति। (जल)
3. ……………………. छात्राः पठन्ति। (शिक्षक)
4. ……………………. नद्यः प्रभवन्ति। (पर्वत)
5. …….. मा प्रमदः। (स्वाध्याय)

**उत्तरः**

1. बीजात्
2. जलात्
3. शिक्षकात्
4. पर्वतात्
5. स्वाध्यायात्

**प्रश्न 2. पंचमीविभक्तियुक्तपदं उदाहरणानुसारं चिह्नितं कुरुत –**

**उत्तर:**
यथा-काष्ठात् अग्निः जायते मध्यमानात्।
(i) कोटः अपि सुमनः सङ्गात् आरोहित सतां शिरः।

(ii) धैयात् कदाचित् स्थितिम् आप्नुयात् सः।

(iii) विद्या ददाति विनय
विनयाद् याति पात्रताम्
पात्रत्वाद् धनमाप्नोति
धनाद् धर्मः ततः सुखम्।

(iv) सत्यात् अपि हितं वदेत्।

(v) दोषक्षयोऽग्निवृद्धिश्च
व्यायामादुपजायते।

**प्रश्न 3. उदाहरणानुसारं लिखत –**

**उत्तर:**

| | शब्दः | विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा– | सैनिक | पञ्चमी | सैनिकात् | सैनिकाभ्याम् | सैनिकेभ्यः |
| | रक्षकः | **पञ्चमी** | **रक्षकात्** | **रक्षकाभ्याम्** | **रक्षकेभ्यः** |
| | मनुष्यः | **पञ्चमी** | **मनुष्यात्** | **मनुष्याभ्याम्** | **मनुष्येभ्यः** |
| | महिला | पञ्चमी | महिलायाः | **महिलाभ्याम्** | महिलाभ्यः |
| | देवी | **पञ्चमी** | **देव्याः** | **देवीभ्याम्** | **देवीभ्यः** |
| | कन्या | **पञ्चमी** | **कन्यायाः** | **कन्याभ्याम्** | **कन्याभ्यः** |
| | मित्रम् | पञ्चमी | मित्रात् | मित्राभ्याम् | मितेभ्यः |
| | पात्रम् | **पञ्चमी** | **पात्रात्** | **पात्राभ्याम्** | **पात्रेभ्यः** |
| | गात्रम् | **पञ्चमी** | **गात्रात्** | **गात्राभ्याम्** | **गात्रेभ्यः** |

**प्रश्न 4. यथोचितं योजयत –**

**उत्तरः**

| | | | |
|---|---|---|---|
| पिपीलिका | नरात् | **पिपीलिका** | **पिपीलिकायाः** |
| देव | वृद्धायाः | **देव** | **देवात्** |
| सैनिक | मधुमक्षिकायाः | **सैनिक** | **सैनिकात्** |
| मधुमक्षिका | सैनिकात् | **मुधमक्षिका** | **मुधमक्षिकायाः** |
| वृद्धा | देवात् | **वृद्धा** | **वृद्धायाः** |
| नर | पिपीलिकायाः | **नर** | **नरात्** |

**सम्बन्धे (षष्ठीविभक्तिः)**

**अभ्यासः**

**प्रश्न 1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

1. बालः ……………… अङ्के उपविशति।
2. अद्य चिकित्सालयेषु ……………….. संख्या प्रतिदिनं वर्धते।
3. वृक्षाः …………………… आधारभूताः सन्ति ।
4. अद्यत्वे ………………… जीवनं कष्टमयं जायते।
5. ……………… रक्षणाय वृक्षाणाम् आरोपणम् आवश्यकम्।

**उत्तरः**

1. पितुः
2. रुग्णानाम्
3. पर्यावरणस्य
4. नगरस्य्
5. जीवनस्य

**प्रश्न 2. षष्ठीविभक्तियुक्तपदानि चित्वा लिखत –**

**(i) महाजनस्य संसर्गः**
कस्य नोन्नतिकारकः।

**उत्तर:**

महाजनस्य

कस्य

**(ii) अभिवादनशीलस्य**
नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते
आयुर्विद्या यशो बलम्।

**उत्तर:**

अभिवादनशीलस्य

वृद्धोपसेविनः

तस्य

**(iii) मानो हि महतां धनम्।**
**उत्तर:**

महताम्

**(iv) गच्छन् पिपीलको याति**
योजनानां शतान्यपि।

**उत्तर:**

| |
|---|
| योजनानाम् |

**(v) नरस्याभरणं रूपं रूपस्याभरणं गुण:।**
गुणास्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा।।

**उत्तर:**

| | | | |
|---|---|---|---|
| नरस्य | रूपस्य | गुणस्य | ज्ञानस्य |

**प्रश्न 3. उदाहरणानुसारं लिखत –**

| | नर | |
|---|---|---|
| नरस्य | नरयो: | नराणाम् |

| | क्षमा | |
|---|---|---|
| ………… | ………… | ………… |

| | वेद | |
|---|---|---|
| ………… | ………… | ………… |

| | नदी | |
|---|---|---|
| ………… | ………… | ………… |


| | तरु | |
|---|---|---|
| ………… | ………… | ………… |

| | विद्या | |
|---|---|---|
| ………… | ………… | ………… |

**उत्तरः**

| | | | |
|---|---|---|---|
| नर | नरस्य | नरयोः | नराणाम् |
| क्षमा | क्षमायाः | क्षमयोः | क्षमानाम् |
| वेद | वेदस्य | वेदयोः | वेदानाम् |
| नदी | नद्याः | नद्योः | नदीनाम् |
| तरु | तरोः | तर्वोः | तरुणाम् |
| विद्या | विद्यायाः | विद्ययोः | विद्यानाम् |


**प्रश्न 4. षष्ठीविभक्तियुक्तपदानां रचनां कुरुत –**




**उत्तरः**

| | | |
|---|---|---|
| अश्वस्य | नरस्य | बालस्य |
| छात्रस्य | जनस्य | कृषकस्य |

याः- लता, प्रज्ञा, सभा, रमा, क्षमा, विद्या




**उत्तरः**

| | | |
|---|---|---|
| लतायाः | प्रज्ञायाः | सभायाः |
| रमयाः | क्षमायाः | विद्यायाः |

**प्रश्न 5. प्रदत्तम् उदाहरणम् अनुसृत्य षष्ठीविभक्तिम् उपयुज्य पञ्च वाक्यानि लिखत।**

**उदाहरणम् –**
1. अहं विद्यायाः महत्त्वं जानामि।
2. कृषकस्य क्षेत्र हरितम् अस्ति।

**उत्तरः**
1. सः धनस्य अर्जन करोति।
2. रामः वृद्धस्य सेवां करोति।
3. अहं वेदस्य पाठं करोमि।
4. जनाः मातुः वार्ता मन्येरन्।
5. कर्मफलाना ज्ञाता ईश्वरः एवास्ति।

**अधिकरणकारकम् (सप्तमी-विभक्तिः )**

**अभ्यासः**

**प्रश्न 1. कोष्ठकात् उचितं पदं चित्वा लिखत –**

1. अद्य तु ............ अपि वृक्षाः न सन्ति। (पर्वतीयस्थलम्, पर्वतीयस्थले)
2. ............... नराणां किमपि असाध्यं न अस्ति (सोत्साहाना, सोत्साहैः)
3. .......... मैत्री सदैव लाभकारिणी भवति। (सज्जनैः, सज्जनानाम्)
4. अद्य बालाः चलभाषस्य .......... रताः भवन्ति। (प्रयोगे, प्रयोगस्य)
5. .......... रक्षायाः विषये सचेताः भयेवुः। (पर्यावरणस्य, पर्यावरणे)


**उत्तरः**

1. पर्वतीयस्थले
2. सोत्साहानां
3. सज्जनानाम्
4. प्रयोगे
5. पर्यावरणस्य

**प्रश्न 2. सप्तमीविभक्तियुक्तपदानि चित्वा लिखत –**

(i) उत्सवे व्यसने चैव
दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च,
यस्तिष्ठति स बान्धवः।

**उत्तर:**




**(ii) परोक्षे कार्यहन्तारम्,**
प्रत्यक्षे प्रियवादिनम्।
वर्ययेत् तादृशं मित्रम्,
विषकुम्भं पयोमुखम्॥

**उत्तर:**




**(iii) न कूपखनन युक्त**
प्रदीप्ते वह्निना गृहे।

**उत्तरः**

प्रदीप्ते — गृहे

**(iv) सत्यमेवेश्वरो लोके**
सत्ये धर्मः समाश्रितः।

**उत्तरः**

लोके — सत्ये

**प्रश्न 3. उदाहरणमनुसृत्य अधोलिखितान् कोष्ठकान् यथायोग्यपदैः पूरयत –**

| | | | |
|---|---|---|---|
| **यथा जन** | जने | जनयोः | जनेषु |
| विद्वस् | ............ | ............ | ............ |
| आत्मन् | ............ | ............ | ............ |
| राजन् | ............ | ............ | ............ |
| क्षमा | ............ | ............ | ............ |
| नदी | ............ | ............ | ............ |

**उत्तरः**

| | | | | |
|---|---|---|---|---|
| यथा | जन | जने | जनयोः | जनेषु |
| विद्वत् | | विदुषि | विदुयोः | विद्वत्सु |
| आत्मन् | | आत्मनि | आत्मनोः | आत्मसु |
| राजन् | | राज्ञि | राज्ञोः | राजसु |
| क्षमा | | क्षमायाम् | क्षमयोः | क्षमासु |
| नदी | | नद्याम् | नद्योः | नदीषु |

**प्रश्न 4. अधिकरणकारकं सप्तमीविभक्तिं च उपयुज्य प्रदत्तम् उदाहरणाम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणम् –**
1. जले मत्स्याः सन्तरन्ति।
2. लतायां पुष्पाणि सन्ति

**उत्तर:**
1. मानवेषु एक: देवः अपि भवेत्।
2. छात्रेषु शिक्षक: स्निहयति।
3. माता पुत्रे विश्वसिति।
4. प्रातः काले एव स्नानं कुर्यात्।
5. मम माता गृह एवं अस्ति। ।

अधोलिखितानि उदाहरणानि पठत –



**बालः** खेलति।



**बालौ** धावतः।



**बालाः** उपविशन्ति।



**महिलाः** वदन्ति।



**पुष्पाणि** विकसन्ति।

## कर्मकारकम्

अधोलिखितानि उदाहरणानि पठत –



पुत्रः पुत्री च **जनकम्** अनुसरतः।

पिता **बालौ** कथयति।





अध्यापकः **बालान्** कथयति।

पिता **कन्यां** कथयति।





पुत्रि! पश्य तत्र **द्वे चटके** स्तः।

**रमा-** द्वे न तिस्रः (पिता तिस्रः **चटकाः** पश्यति।)





पुत्रः **जलम्** यच्छति।



अम्बा **भोजनं** यच्छति

रमा तत्र त्रीणि **पात्राणि** स्थापयति।



## करणकारकम् (तृतीया-विभक्तिः )

## अधोलिखितानि उदाहरणानि पठत –



**मेघैः** वर्षा भवति।

सरोवरः **कमलैः** भाति।



वृक्षः **पुष्पैः** शोभते।



उपवनं **वृक्षैः** शोभते।





वृक्षः **शाखाभिः** शोभते।

वानरः **कर्णाभ्याम्** बधिरः।



## सम्प्रदानकारकम् (चतुर्थी-विभक्तिः)

## अधोलिखितानि उदाहरणानि पठत –



बालः **पठनाय** गच्छति।

जनः **कार्यालयाय** गच्छति।





वृद्धः **भ्रमणाय** गच्छति।

वृद्धा **पूजनाय** गच्छति।





चिकित्सिका **उपचाराय** गच्छति।

कन्या **प्रार्थनायै** गच्छति।





पिता **बालकाय** क्रुध्यति।

**मह्यं** रोटिका न रोचते।





**इन्द्राय** नमः।

**अग्नये** स्वाहा।





**सर्वेभ्यः** स्वस्ति।

## अपादानकारकम् (पंचमी-विभक्तिः )

## अधोलिखितानि उदाहरणानि पठत –



अश्वारोही **अश्वात्** पतति।

**लतायाः** पुष्पाणि पतन्ति।






**वृक्षात्** पत्राणि पतन्ति।

उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि 'अपादानकारके' सन्ति। अपादानकारके 'पंचमीविभक्तिः' प्रयुज्यते



गंगा **हिमालयात्** निस्सरति।

बालः **अध्यापकात्** पठति।



बालः **अध्ययनात्** प्रमाद्यते।



बाला **बिडालात्** बिभेति।





बालकः **गृहात्** बहिः आगच्छति।

**सम्बन्धे (षष्ठीविभक्तिः)**

**अधोलिखितानि उदाहरणानि पठत –**


1. अधोलिखितानि वाक्यानि पठत —



पश्यत। तत्र **वानरस्य** क्रीडा भवति।



सुन्दरं **मयूरस्य** नृत्यम्



**गजस्य** गतिः सुन्दरा।



**कोकिलस्य** गीतं सुन्दरम्।



**कपोतानां** सङ्घटनं प्रसिद्धम्।



**मृगस्य** स्वभावः मुग्धः।



**मधुमक्षिकायाः** स्वभावः मधुसञ्चयः

## अधिकरणकारकम् (सप्तमी-विभक्तिः )

## अधोलिखितानि उदाहरणानि पठत –



**आकाशे** चन्द्र: उदयति।

**नदीषु** अवकरं मा क्षिप।





**गृहे** कोऽपि नास्ति।


माता **कन्यायां** स्निह्यति।





**हे मेघ!** वर्षां कुरु।

**हे इन्द्रदेव!** वर्षय अधुना।





हे **मेघ!** प्रसन्नोऽस्मि।